व्यवहा
व्यवहा

योक्तुः शिरोवर्त्तित्वोक्तेरभियोज्यस्य दिव्यकर्तृत्वं प्रतीयते। प्रत्यर्थीच्छया अर्थिनो दिव्यमाह रुच्येति। इतरोऽभियुक्तः। एतच्च दिव्यतत्त्वे विवृतम्। प्रतिज्ञातार्थसाधकमिति साधकं साक्ष्यादिकम्। तदाह बृहस्पतिः।

"द्विप्रकारा क्रिया प्रोक्ता मानुषी दैविकी तथा।
साक्षिलेख्यानुमानञ्च मानुषी त्रिविधा स्मृता।
घटाद्या धर्म्मजान्ता च दैविकी नवधा स्मृता॥"

तत्रानुमानन्तु युक्त्यादि। * । तत्र साक्ष्यमाह मनुः।

"समक्षदर्शनात् साक्ष्यं श्रवणाच्चैव सिध्यति।"

एतत् प्रमाणमात्रोपलक्षणम्।

"अनुभावी च यः कश्चित् कुर्य्यात् साक्ष्यं विवादिनाम्।"

इति तद्वचनान्तरात्।

अतएवाकृतमपि साक्षिणमाह मनुः।

"यत्रानिबद्धो वीक्षेत शृणुयाद्वापि किञ्चन।
पृष्टस्तत्रापि तद्ब्रूयात् यथादृष्टं यथाश्रुतम्॥"

अनिबद्धस्तत्र साक्षित्वेनानियुक्तः। परम्परयापि श्रवणमाह विष्णुः।

"उद्दिष्टसाक्षिणि मृते देशान्तरगतेऽपि वा।
तदभिहितश्रोतारः प्रमाणं नात्र संशयः॥"

अस्योत्तरसंज्ञामाह नारदः।

"साक्षिणामपि यत् साक्ष्यं सपक्षं परिभाषितम्।
श्रवणात् श्रावणाद्वापि स साक्ष्युत्तरसंज्ञकः॥"

सपक्षसम्बन्धि साक्ष्यं परिभाषतां साक्षिणां यः स्वयं शृणोति अर्थिना श्रावितो वा स श्रवणात् श्रावणादुत्तरसाक्षीत्यर्थः। एवं योऽर्थिना गूढ़तया प्रत्यर्थिवचनं श्रावितः स गूढ़साक्षीत्याह स एव।

"अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम्।
यः श्राव्यते तदा गूढ़ो गूढ़साक्षी स उच्यते॥"

तेनान्यतरवाद्यभिहितार्थविषयकशब्दकारणकं विज्ञापनं साक्ष्यमिति स्थितम्। तत्र नारदः।

"तेषामपि न बालः स्यान्नैको न स्त्री न कूटकृत्।
न बान्धवो न चारातिर्ब्रूयुस्ते कार्य्यमन्यथा॥"

कार्य्यं सदपि अन्यथा तद्विरुद्धत्वेन। एवञ्च यदि परमधार्म्मिकत्वेन बान्धवादीनामपि सत्यवादित्वं निश्चीयते तदा तेऽपि साक्षिणो भवितुमर्हन्तीति। तेषां साक्ष्यविधायकं वक्ष्यमाणमनुवचनमपि तन्मात्रविषयम्। याज्ञवल्क्यः।

"त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्त्तक्रियापराः।
यथाजाति यथावर्णं सर्व्वे सर्व्वेषु वा स्मृताः॥"

त्रयोऽवरा निकृष्टा येषां ते त्र्यवराः त्रिभ्योऽन्यूना भवन्तीत्यर्थः। यथेति यो यज्जातीयस्तस्य तज्जातीयः साक्षी। स्त्रीणां स्त्रियोऽन्त्यजानामन्त्यजाः। यथावर्णं ब्राह्मणानां ब्राह्मणाः क्षत्त्रियादीनां क्षत्त्रियादयः। अभावे तु तत्तद्भेदं विना सर्व्व एव। त्र्यवरा इत्यस्यापवादमाह स एव।

"उभयानुमतः साक्षी भवेदेकोऽपि धर्म्मवित्।"

उभयानुमतत्वं धर्म्मवित्त्वञ्च नियतं तन्त्रम्। तदाह विष्णुः। अभिमतगुणसम्पन्नस्तूभयानुमत एकोऽपि इति। अतएव श्रोत्रियमप्येकं निषेधयति बृहस्पतिः।

"नव सप्त पञ्च वा स्युश्चत्वारस्त्रय एव वा।
उभौ तु श्रोत्रियौ ग्राह्यौ नैकं पृच्छेत् कदाचन॥"

एको मिलितगुणसम्पन्नः प्रधानकल्पः तदभावे उभयानुमतमात्रोऽपि ग्राह्यस्तदाह नारदः।

"उभयानुमतो यः स्याद्द्वयोर्व्विवदमानयोः।
भवत्येकोऽपि साक्षित्वे प्रष्टव्यः स्यात् स संसदि॥"

उभयानुमत एकोऽलुब्धत्वादिना सर्व्वजनप्रसिद्धश्चेत्तदा साक्षित्वे संसदि बहुजनसन्निधौ प्रष्टव्यः तथात्वे लोकवैरादिसत्त्वेऽप्यकीर्त्तिभयात् सत्याभिधानसम्भवादित्याशयः। विचारस्य तत्त्वनिर्णयार्थत्वात्तदाह मनुः।

"एकोऽप्यलुब्धः साक्षी स्यात् बह्व्यः शुच्योऽपि न स्त्रियः।
स्त्रीबुद्धेरस्थिरत्वात्तु दोषैश्चान्येऽपि ये वृताः॥"

एकोऽलुब्धस्तु साक्षी स्यादिति कुल्लूकभट्टधृतपाठः। एको लुब्धस्त्वसाक्षी स्यादिति जीमूतवाहनधृतपाठस्तु न युक्तः। लुब्धाश्चेद्बहवोऽप्यसाक्षिणो भवितुमर्हन्तीति एकपदव्यर्थतापत्तेः। भवतु वा तत्पाठः तथाप्येक इत्यनुरोधात् तन्निषेधमुखेनालुब्धस्यैकस्यानुमतिसत्त्वे धर्म्मवित्त्वमन्तरेण साक्षित्वं बोध्यं इत्यर्थतो न विरोधः। अतएव विश्वरूपप्रभृतीनां उभयानुमत एक एव साक्षीति व्याख्याने धर्म्मवदिति नोक्तम्। दोषैस्तेयादिभिः। तथा च नारदः।

"स्तेनाः साहसिका धूर्त्ताः कितवा योधकाश्च ये।
असाक्षिणस्तु ते दृष्टास्तेषु सत्यं न विद्यते॥"

कितवा द्यूतकराः ॥*॥ अपवादमाह उशनाः।

"दासोऽन्धो वधिरः कुष्ठी स्त्रीबालस्थविरादयः।
एतेऽप्यनभिसम्बद्धाः साहसे साक्षिणो मताः॥"

स्थविरो म्लानेन्द्रियग्रामः। आदिशब्दात् कितवादयः। उभयानुमताभावे शुचिक्रियत्वादिगुणश्चैको ग्राह्यः। तथा च व्यासः।

"शुचिक्रियश्च धर्म्मज्ञो योऽन्यत्राप्यनुभूतवाक्।
प्रमाणमेकोऽपि भवेत् साहसेषु विशेषतः॥"

अनुभूतवाक् स्थानान्तरे सत्यत्वेनेति। भवदेवभट्टोऽप्येवम्॥ साहसमाह नारदः।

"मनुष्यमारणं स्तेयं परदाराभिमर्षणम्।
पारुष्यमनृतञ्चैव साहसं पञ्चधा स्मृतम्॥"

कात्यायनः।

"अभ्यन्तरस्तु निःक्षेपे साक्ष्यमेकोऽपि दापयेत्।
अर्थिना प्रहितः साक्षी भवेदेकोऽपि याचिते॥
संस्कृतं येन यत् पण्यं तत्तेनैव विभावयेत्।
एक एव प्रमाणं स विवादे परिकीर्त्तितः॥"

संस्कृतं गठितं पण्यं कुण्डलादि। विष्णुः। स्तेयसाहसवाग्दण्डपारुष्यसंग्रहणेषु साक्षिणां न परीक्षा इति स्तेयपरदारगमनादिकार्य्याणां निह्नवेनैव क्रियमाणत्वात् दैवादेव परं साक्षिणो भवन्तीति न परीक्षा इत्युक्तम्। तेषां वाक्यन्तु मित्रारिभावादिनिरूपणेनैवोपपत्त्यनुपपत्तिभ्यामालोचनीयम्। न तु वाक्यमात्रादिति व्यवहारमातृका॥ अतएव कात्यायनः।

"ऋणादिषु परीक्षेत साक्षिणः स्थिरकर्म्मसु।
साहसात्ययिकेनैव परीक्षा कुत्रचित् स्मृता॥"

इति ॥*॥

श्रोत्रियादीनामसाक्ष्यमाह नारदः।

"श्रोत्रियास्तापसा वृद्धा ये च प्रव्रजिता नराः।
वचनात्तेष्वसाक्षित्वं नात्र हेतुरुदाहृतः॥"

दानरत्नाकरे श्रोत्रियमाह देवलः।

"एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य वा।
षट्कर्म्मनिरतो विप्रः श्रोत्रियो नाम धर्म्मवित्॥"

सकल्पां कल्पमात्राङ्गसहिताम्। षड्भिरिति सहार्थे तृतीया। वचनादिति श्रोत्रियत्वादिरूपाभिधानात् न च तत्रान्यो हेतुरित्यर्थः। तथा च स्वीयवैदिककर्म्मकरणव्यग्रतया परकीयकार्य्ये विस्मरणसम्भवात् साक्षित्वरूपलघुकार्य्यनियोगे तच्छापभयेन व्यवहारद्रष्टारोऽपि तान् न पृच्छन्तीति तत्साक्ष्यकरणानर्थक्यात्र न ते साक्षिणः कर्त्तव्याः किन्त्वकृताः स्वयं साक्षिणो भवन्त्येव। उभौ तु श्रोत्रियौ स्याताम् इति स्मृतेः। वृद्धस्यासाक्षित्वं वृद्धत्वादेव म्लानेन्द्रियत्वादित्यर्थः। मनुः।

"स्त्रीणां साक्ष्यं स्त्रियः कुर्य्युर्द्विजानां सदृशा द्विजाः।
शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः॥
अन्तर्वेश्मन्यरण्ये वा शरीरस्यात्ययेऽपि च।
स्त्रियाप्यसम्भवे कार्य्यं बालेन स्थविरेण वा॥
शिष्येण बन्धुना वापि दासेन भृतकेन वा।
देवब्राह्मणसान्निध्ये साक्ष्यं पृच्छेदृतं द्विजान्॥
उदङ्मुखान् प्राङ्मुखान् वा पूर्व्वाह्णे वै शुचिः शुचीन्।
ब्रूहीति ब्राह्मणं पृच्छेत् सत्यं ब्रूहीति पार्थिवम्॥
गोबीजकाञ्चनैर्व्वैश्यं शूद्रं सर्व्वैस्तु पातकैः॥"

गोबीजकाञ्चनापहारे यत् पापं तत्तवानृताभिधाने स्यादिति वैश्यम्। एतस्मादनृताभिधाने भवान् सर्व्वैः पातकैः संवध्यत इत्युक्त्वा शूद्रञ्च पृच्छेत्।

"ब्रह्मघ्नो ये स्मृता लोका ये च स्त्रीबालघातिनः।
मित्रद्रुहः कृतघ्नस्य ते ते स्युर्ब्रुवतो मृषा॥"

इति मनूक्तं दूषणम्। सत्फलञ्च।

"अश्वमेधसहस्रन्तु सत्यञ्च तुलया धृतम्।
अश्वमेधसहस्राद्धि सत्यमेवातिरिच्यते॥"

इति मनुनारदोक्तं श्रावयेत्॥

याज्ञवल्क्यः।

"न ददाति हि यः साक्ष्यं जानन्नपि नराधमः।
स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि॥"